# Skandaproktam Bhasmatattvopadesham

# સ્કન્દપ્રોક્તં ભસ્મતત્ત્વોપદેશમ્

## Document Information

Text title : Skandaproktam Bhasmatattvopadesham

File name : skandaproktaMbhasmatattvopadesham.itx

Category : shiva, upadesha, advice, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 5 | 1-39||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 10, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં ભસ્મતત્ત્વોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઈશ્વરાખ્યે)

- સ્કન્દજૈગીષવ્યસંવાદે -

સ્કન્દ ઉવાચ -
શ્રીભાલલોચનેનૈવ બૃહજ્જાબાલસમ્ભવમ્ ।
ભસ્મોક્તં વિમુક્તેર્હિ જન્મ જન્મવતાં મુને ॥ ૧॥

શ્રૃણુષ્વ સાવધાનેન ત્વમેકાગ્રેણ ચેતસા ।
સદ્યોજાતોદ્ભવાત્ વક્ત્રાત્ પૃથિવી સમજાયત ॥ ૨॥

પૃથિવીરૂપિણી યા સા ગૌર્જજ્ઞે કપિલાખ્યયા ।
નન્દા સા નામતો વિપ્ર તસ્યાં ભૂતિર્બભૂવ હ ॥ ૩॥

વામદેવમુખાચ્છમ્ભોર્વાર્યગ્રે સમજાયત ।
કૃષ્ણવર્ણા તતો ભદ્રા તસ્યાં વૈ ભસિતં સિતમ્ ॥ ૪॥

પ્રખ્યાતં મુનિશાર્દૂલ શૂલપાણિપ્રસાદકૃત્ ।
અઘોરવક્ત્રાદભવત્ લેલિહાનનોજ્જ્વલત્પ્રભઃ ॥ ૫॥

વહ્નિરહ્નાય જગતાં મધ્યાહ્નાર્કશતોપમઃ ।
રક્તા ચ વૈ શ્વેતવર્ણા સુરભિઃ સમજાયત ॥ ૬॥

તસ્યાં હિ ભસ્મ સઞ્જાતં ભાસનં પાવનં પરમ્ ।
તત્પૂરુષમુખાદ્વાયુઃ સર્વાયુઃ કારણો મહાન્ ॥ ૭॥

તસ્માચ્છ્વેતાઽભવદ્વર્ણા સુશીલા ગૌઃ પયસ્વિની ।
તસ્માત્ક્ષારં સમુત્પન્નં ક્ષરસ્તમ્નકુલં મુને ॥ ૮॥

ઈશાનવક્ત્રાદાકાશો વ્યોમકેશાદ્બભૂવ હ ।
તસ્માચ્ચ ચિત્રવર્ણાભૂત્ સુમના સા પયસ્વિની ॥ ૯॥

તદ્રોમયોત્થા રક્ષાઽભૂત્ સાક્ષાત્ ત્ર્યક્ષપ્રસાદકૃત્ ।

વિદ્યા શાન્તિઃ પ્રતિષ્ઠા ચ શાન્ત્યતીતા મનોન્મની ॥ ૧૦॥

કલાઃ પઞ્ચસમુત્પન્નાઃ ક્રમોઽયં શઙ્કરાજ્ઞયા ।
વિભૂતિર્ભસિતં ભસ્મ ક્ષારં રક્ષેતિ વૈ મુને ॥ ૧૧॥

ભવન્તિ પઞ્ચનામાનિ પઞ્ચવક્ત્રોદ્ભવાનિ હિ ।
ઐશ્વર્યકારણા ભૂતિર્ભસ્મ સર્વાઘભક્ષણાત્ ॥ ૧૨॥

ભાસનાદ્ભસિતં પ્રોક્તં ક્ષારણાત્ક્ષારમાપદામ્ ।
સંસારભયભીતાનાં રક્ષા સંરક્ષણાન્મુને ॥ ૧૩॥

અગ્નીષોમાત્મકં ભસ્મ સમ્પ્રોક્તં મુનિસત્તમ ।
એકો વહ્નિર્યથા યજ્ઞે સમિન્ધેતાધ્વરે તદા ॥ ૧૪॥

બહુરૂપો મુનિશ્રેષ્ઠ તથેદં ભસ્મ પાવનમ્ ।
અતનોર્દેવદેવસ્ય અષ્ટમૂર્તેઃ પિનાકિનઃ ॥ ૧૫॥

અગ્નિરિત્યુચ્યતે રૌદ્રી ઘોરા યા તૈજસી તનુઃ ।
સોમઃ શક્ત્યાઽમૃતમયઃ શાન્તિઃ કીર્તિકરી તનુઃ ॥ ૧૬॥

અમૃતં યત્પ્રતિષ્ઠા સા તેજોવિદ્યાકલા સ્વયમ્ ।
સ્થૂલસૂક્ષ્મેષુ ભૂતેષુ તે એવ રસતેજસી ॥ ૧૭॥

દ્વિવિધા તેજસો વૃત્તિઃ સૂર્યાત્મા ચાનલાત્મિકા ।
વૈદ્યુતાદિમયં તેજો મધુરાદિમયો રસઃ ॥ ૧૮॥

તેજોરસવિભેદેન જગદ્વ્યાપ્તં ચરાચરમ્ ।
અગ્નેરમૃતનિષ્પત્તિરમૃતેનાગ્નિરિષ્યતે ॥ ૧૯॥

અત એવ હવિઃ ક્લૃપ્તં મુને સર્વમુખેષુ ચ ।
હવિષા સસ્યસમ્પત્તિર્વૃષ્ટિઃ સસ્યાભિવૃદ્ધયે ॥ ૨૦॥

વિસ્તૃપ્તાઃ સુરાઃ સર્વે અગ્નીષોમાત્મકં જગત્ ।
ઊર્ધ્વશક્તિમયઃ સોમો હ્યધઃ શિવમયોઽનલઃ ॥ ૨૧॥

આભ્યાં સમ્પુટિતં યસ્માચ્છશ્વદ્વિશ્વમિદં જગત્ ।
અગ્નિરૂર્ધ્વં જ્વલત્યેષ યાવત્સૌમ્યં પરાવૃતમ્ ॥ ૨૨॥

યાવદસ્યાસ્પદં સૌમ્યમમૃતં વિસૃજત્યધઃ ।
અત એવ હિ કાલાગ્નિરધસ્તાચ્છક્તિરૂર્ધ્વગા ॥ ૨૩॥

યાવતા દહનશ્ચોર્ધ્વમધશ્ચાપ્લાવનં ભવેત્ ।
આધારશક્તિવિધૃતઃ કાલાગ્નિરયમૂર્ધ્વગઃ ॥ ૨૪॥

તથૈવ નિમ્નગઃ સોમઃ શિવશક્તિપદાસ્પદઃ ।
શિવશ્ચોર્ધ્વમયઃ શક્તિરૂર્ધ્વશક્તિરધઃ શિવઃ ॥ ૨૫॥

તદિત્થં શિવશક્તિભ્યાં (વિના) ન વ્યાપ્તમિહ કિઞ્ચન ।
અસકૃચ્ચાગ્નિના દગ્ધં જગત્તદ્ભસ્મસાત્કૃતમ્ ॥ ૨૬॥

અગ્નેર્વીર્યમિદં પ્રાહુસ્તદ્વીર્યં ભસ્મ યત્તતઃ ।
યશ્ચેત્થં ભસ્મસદ્ભાવં જ્ઞાત્વા હિ સ્નાતિ ભસ્મના ॥ ૨૭॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈર્દગ્ધપાશઃ સ ઉચ્યતે ।
અગ્નેર્વીર્યં તુ તદ્ભસ્મ સોમેનાપ્લાવિતં પુનઃ ॥ ૨૮॥

અયોગયુક્તા પ્રકૃતિરધિકારાય કલ્પતે ।
યોગયુક્તં તુ તદ્ભસ્મ પ્લાવ્યમાનં સમન્તતઃ ॥ ૨૯॥

શાક્તેનામૃતવર્ષેણ સ્વાધિકારાન્નિવર્તયેત્ ।
અતો મૃત્યુઞ્જયાયેત્થમમૃતપ્લાવનં સતામ્ ॥ ૩૦॥

શિવશક્ત્યમૃતસ્પર્શે લબ્ધ એવ કુતો મૃતિઃ ।
યો વેદ ગહનં યુધ્દં પ્લાવનં ચ તથોદિતમ્ ॥ ૩૧॥

અગ્નીષોમમયં જગત્સ્થિરચરં સમ્ભાવિતં શઙ્કરાત્
સારાસારવિચારસાગરમહાપારીણધુર્યા મુને ।
જાનન્ત્યેવ ગતાગતેષુ નિતરામુત્કૃષ્ટભાવાભવે
ભાવા એવ ભવેઽપિ ભાવપરમા ભસ્મૈકભાવાસદઃ ॥ ૩૪॥

અગ્નિષ્ટોમપુટોદ્ભવેન ભસિતા લોકા વ ભૂષાઙ્ગકાઃ
શાઙ્ગા એવ ભવન્તિ ભાગ્યપરમાઃ પાપૌઘભઙ્ગાશયાઃ ।
દગ્ધાનઙ્ગમહાઙ્ગસઙ્ગભુજગાભોગાઙ્ગલિઙ્ગાર્ચકાઃ
પુણ્યાપારપતઙ્ગ ભાવભવનાસ્તે પાવના ભૂતલે ॥ ૩૫॥

યો વા કોવા વિભૂત્યા ભવતિ હિ કલિતો દિવ્યદેહસ્ત્રિપુણ્ડ્રૈઃ
સર્વેષામપિ પાવનો હિ સભવેત્સ્વાલોકસઙ્ગેન હિ ।
તત્સઙ્ગેન ચ ખણ્ડિતાઘનિચયો ભૂયો ભવેદ્વૈ જનો
જાનન્તિ શ્રુતિયુક્તિસૂક્તિવચનૈસ્તદ્ભસ્મનોઽમ્બ પ્રભો ॥ ૩૬॥

આર્યાવર્તસ્થિતાર્યાઃ શ્રુતિગદિતમહાપૂતભસ્માદિભિર્યે
પુણ્ડ્રં ભાલતલે નિધાય વિમલં સર્વાઘસઙ્ઘોજ્ઝિતાઃ ।
શર્વસ્યૈવ સમર્ચનપ્રિયતરા ગર્વાદિવર્ગોજ્ઝિતાઃ ।
તે વીર્યૈરધિકાસ્તરન્તિ ભુવનં હ્યાચાર્યવૃત્તિસ્થિતાઃ ॥ ૩૭॥

ભસ્મેદં સ્મરહન્તૃભાલફલકાલઙ્કારભૂતં સદા
પાપૌઘાતુલઘસ્મરં સ્મૃતિકૃતાં બુધ્યાદિબોધપ્રદમ્ ।
જ્ઞાનં ચાપિ દિશેત્યુમે વિધિધૃતં તિર્યક્ત્રિકાલેષ્વપિ
સર્વેષામવિશેષતો દ્વિજગણેષૂક્તં વિશેષેણ હિ ॥ ૩૮॥

સમામ્નાતામ્નાય પ્રબલવચનેનાલમિતર-
પ્રમાણાનાં સઙ્ઘૈઃ શ્રુતિગદિતસીમાનુસારણમ્ ।
પ્રમાદો નો ભૂત્યૈ ભવતિ સુખ કીતિર્નવિનશ-
ચ્છિવોત્કર્ષજ્ઞાનં ભવતિ ચ વિમુક્તઃ પરતરમ્ ॥ ૩૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં ભસ્મતત્ત્વોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશ્વરાખ્યઃ દશમાંશઃ । અધ્યાયઃ ૫ । ૧-૩૯॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 5 . 1-39..

Notes:

Skanda સ્કન્દ speaks to Jaigīṣavya જૈગીષવ્ય about the origin of Bṛhajjābāla બૃહજ્જાબાલ.
He explains about the origin Pañcatattva પઞ્ચતત્ત્વ from ŚivaPañcamukha-s શિવપઞ્ચમુખાઃ; viz.
Pṛthivī પૃથિવી - Sadyojāta સદ્યોજાત
Vāri વારિ - Vāmadeva વામદેવ
Vahni વહ્નિ - Aghora અઘોર
Vāyu વાયુ - Tatpuruṣa તત્પુરુષ
Vyoma વ્યોમ - Īśāna ઈશાન
Five types of Bhasma are described i.e. BhasmaPañcanāmāni ભસ્મપઞ્ચનામાનિ viz., Vibhūti વિભૂતિ, Bhasita ભસિત, Bhasma ભસ્મ, Kṣāra ક્ષાર, Rakṣā રક્ષા.
The AgniṢomātmaka અગ્નિષોમાત્મક and ŚivaŚaktyātmaka શિવશક્ત્યાત્મક Nature of The Universe, and the Nature of Kālāgni કાલાગ્નિ is defined in context of Yoga યોગ.
ŚivaRahasyam daśamāṃśaḥ શિવરહસ્યં દશમાંશઃ has several chapters devoted to Bhasma ભસ્મ - it's preparation, application, related mantra-s etc.

Proofread by Ruma Dewan

*Skandaproktam Bhasmatattvopadesham*
pdf was typeset on September 10, 2024

Please send corrections to *sanskrit@cheerful.com*